## दीप स्तुति

दीपज्योतिः परम् ज्योतिः, दीपज्योतिर्जनार्दनः |
दीपोहरतु मे पापं, दीपज्योतिर्नमोस्तुते ||
शुभं करोतु कल्याणं, आरोग्यं सुखसम्पदः |
द्वेषबुद्धि विनाशाय, आत्मज्योतिर्नमोस्तुते ||
आत्मज्योतिः प्रदीप्ताय, ब्रह्मज्योतिर्नमोस्तुते |
ब्रह्मज्योतिः प्रदीप्ताय, गुरूज्योतिर्नमोस्तुते ||

## सरस्वतीवंदना

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥
शुक्लां ब्रह्मविचार सार परमामाद्यां जगद्व्यापिनीं
वीणाधारिणीमभयदां जाड्यान्धकारापहाम्-पुस्तक- ।
हस्ते स्फटिकमालिकां विदधतीं पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

## प्रार्थना

हे हंसवाहिनी ज्ञानदायिनी,
अम्ब विमल मति दे । अम्ब विमल मति दे ॥
जग सिरमौर बनाएँ भारत,
वह बल विक्रम दे । अम्ब विमल मति दे ॥
साहस शील हृदय में भर दे,
जीवन त्याग-तपोमय कर दे,
संयम सत्य स्नेह का वर दे,
स्वाभिमान भर दे ।
हे हंसवाहिनी ज्ञानदायिनी,
अम्ब विमल मति दे । अम्ब विमल मति दे ॥
लव, कुश, ध्रुव, प्रहलाद बनें हम,

मानवता का त्रास हरें हम,
सीता, सावित्री, दुर्गा माँ,
फिर घर-घर भरदे ।
हे हंसवाहिनी ज्ञानदायिनी,
अम्ब विमल मति दे । अम्ब विमल मति दे ॥

## ब्रह्मनाद

ॐ ध्वनि  ओंकार (3)

## गायत्रीमंत्र

ॐ भूर्भुव स्वः तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥

## भारत माता स्त्रोत्रम्

रत्नाकराधौतपदां हिमालयकिरीटिनीम् |
ब्रह्मराजर्षिरत्नाढ्यां वन्देभारतमातरम् ||

## शांतिपाठ

ॐ द्यौ: शांतिः अंतरिक्षग्वङ्शान्ति:
पृथिवी शान्तिराप: शान्तिरोषधय: शान्ति: ।
वनस्पतयः  शान्तिर्विश्वेदेवा: शान्तिर्ब्रह्म शान्ति:
सर्वग्वङ् शान्ति: शान्तिरेवशान्ति: सा मा शान्तिरेधि ॥
॥ॐ शान्ति: शान्ति: शान्ति: ॥

## भोजनमंत्र

ऊँ ब्रह्मार्पणं ब्रह्माहविर् ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैंव तेन गन्तव्यं ब्रह्म कर्म समाधिना||
ऊँ सहनाववतु | सह नौ भुनक्तु | सहवीर्यं करवावहै|
तेजस्विनावधीतमस्तु मा विद्विषावहै ||
ऊँ शांति|| :शांति :शांति :

राष्ट्रीयगीत वन्देमातरम्

वन्दे मातरम्।

सुजलाम् सुफलाम् मलयजशीतलाम्,

शस्यश्यामलाम् मातरम्। वन्दे मातरम् ।। १।।

शुभ्रज्योत्स्ना पुलकितयामिनीम्,

फुल्लकुसुमित द्रुमदलशोभिनीम्,

सुहासिनीम् सुमधुरभाषिणीम्,

सुखदाम् वरदाम् मातरम्। वन्दे मातरम् ।। २।।

कोटिकल निनाद कराले-कोटि कण्ठ कल-,

कोटिकोटि भुजैर्धृत खरकरवाले-,

के बॉले माँ तुमि अबले,

बहुबलधारिर्णी नमामि तारिणीम्,

रिपुदलवारिर्णी मातरम्। वन्दे मातरम् ।। ३।।

तुमि विद्या तुमि धर्म, तुमि हृदि तुमि मर्म,

त्वम् हि प्राणाः शरीरे, बाहुते तुमि माँ शक्ति,

हृदये तुमि माँ भक्ति,

तोमारेई प्रतिमा गड़ि मन्दिरे।।४ मन्दिरे। वन्दे मातरम् ।।-

त्वम् हि दुर्गा दशप्रहरणधारिणी, कमला कमलदलविहारिणी,

वाणी विद्यादायिनी, नमामि त्वाम्,

नमामि कमलाम् अमलाम् अतुलाम्,

सुजलां सुफलां मातरम्। वन्दे मातरम् ।। ५।।

श्यामलाम् सरलाम् सुस्मिताम् भूषिताम्,

धरणीम् भरणीम् मातरम्। वन्दे मातरम् ।। ६।।

महामृत्युंजय मंत्र

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।

उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात्॥